
॥ श्रीरस्तु ॥



॥ श्रीमते रामानुजाय नमः ॥

श्रीकाञ्ची प्रतिवादिभयङ्कर - अण्णङ्गराचार्यैः

भगवत्प्रभावप्रतिष्ठापनाय प्रणीता

॥ ब्रह्मव्याप्तिपरिष्क्रिया ॥

कोऴियालयतिभिर्लिखितायाः पूर्तिगोचरकृतेरवलोकात् ।
खेदमापुषि विवेकिजनौघे हर्षवर्षमियमाशु तनोतु ॥

सेयम्

गीताचार्यमुद्राक्षरशालायां

सम्मुद्र्य प्रकाशिता

विजयते ।

MADRAS.

1937

धातुसंवत्सर मीनविशाखोड्डुनि

॥ श्रीरस्तु ॥

॥ श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीलोकदेशिकनिगमान्तदेशिकाभ्यां नमः ॥

॥ श्रीमद्वरवरमुनये नमः ॥ श्रीवादिभीकरमहागुरवे नमः ॥

श्रीकाञ्ची प्रतिवादिभयङ्कर - अण्णङ्गराचार्य प्रणीता

॥ ब्रह्मव्याप्तिपरिष्क्रिया ॥

करिशिखरिशिखरशेखरमरिदलनोदञ्चदरिलसद्बाहुम् ।
तरिमिव भवभयजलधेर्हरिमिह विलसन्तमनिशमभियामि ॥ १॥

वरवरमुनिपदसरसिजषट्पदपरवादिभीकरार्यकुले ।
निरतिशयभाग्यविभवादुदितेनाण्णङ्गरार्यदासेन ॥ २॥

कोळियालयतीन्द्राणामन्तःकरणशुद्धये ।
प्रणीयते कृतिस्सैषा ब्रह्मव्याप्तिपरिष्क्रिया ॥ ३॥

श्रीकोळियालयतिपुङ्गवसार्वभौमैः पूर्णत्वगोचरकृतिं ग्रथितामवेक्ष्य ।
सद्यो विवेकिजनसंसदि दास एष पद्यैश्शतेन तनुतेस्म विलोपितां ताम्॥

अनवद्यहृद्यतमपद्यमालिकां महितार्थपुष्टिमधुरामिमामिह ।
लघुटीकया च सहितां प्रकाशयेत्यथ तैस्सुधीभिरवबोधितोऽभवम् ॥

तामेवाज्ञां सतां साधु शिरसा धारयन्नहम् ।
प्रकाशये जगत्प्रीत्यै ब्रह्मव्याप्तिपरिष्क्रियाम् ॥ ६॥

कुचोद्यानां तत्तत्कुमतिकलितानां विहतये
श्रियः पत्युर्विष्णोर्निरवधिमहाशक्तिविभवः ।
पुराणैराचार्यैर्महितमुनिभिश्चाभ्युपगतः
तमाक्षिप्येदानीं कतिचन बुधाः किञ्चिदलिखन् ॥ ७॥

तदालोकाल्लोके सुबहुभगवद्भक्तहृदये
समुत्पन्नं खेदं निरसितुमपार्थान् विदलयन् ।
सदर्थांस्त्रय्यन्तश्रवणबुधभोग्यान् विशदयन्
परब्रह्मव्याप्तेस्सरणिमविचाल्यां प्रकटये ॥ ८॥

इहैकैकवस्तुन्यपि ब्रह्मतत्त्वं समाप्तस्वरूपं चकास्त्यात्मशक्त्या ।
इति स्पष्टमाचार्यवर्यैर्यदुक्तं न तद्दूषणार्था मतिस्साधुयोग्या ॥ ९॥

*परन्दताण्णतिप्रसिद्धकारिसूनुगाथया
तदर्थबोधनप्रवृत्तसर्वपूर्वसूक्तिभिः ।
असंशयं निरूपिते विचित्रशक्तिवैभवे
मुधाकुचोद्यकल्पना न शोभना विवेकिनाम् ॥ १०॥

*किंसाधनः क्व निवसन्निति पद्यरत्ने
श्रीवत्सचिह्नगुरुराट् कुदृशां कुचोद्यम् ।
तत्तादृशं व्यदलयत्परमात्मशक्ते-
रत्यद्भुतत्वमभिधाय हि शास्त्रसिद्धम् ॥ ११॥

*भक्तस्य दानवशिशोरिति पद्यरत्ने
वेदान्तदेशिकमणिः स्फुटमभ्यधत्त
एकैकवस्तुनि च सर्वजगत्सु विष्णोः
पर्याप्तवृत्तिमनवद्यकथावतारान् ॥ १२॥

*पुरिसपहाणेत्यादावच्युतशतकीयपद्यरत्नेऽपि ।
ब्रह्मणि विचित्रशक्तेर्दुर्घटसौघट्यहेतुताभिहिता ॥ १३॥

अल्पीयस्स्वपि चेतनेषु विपुला शक्तिः पुराणादिभिः
प्रोक्ता दुर्घटकृत्यवर्गरचनानिर्वाहदक्षाऽमिता ।
तत्तादृक्षकथास्वसंभवमहो नो कश्चिदाशङ्कते
सर्वा विप्रतिपत्तयो बत बत! ब्रह्मण्यहो धीमताम् ॥ १४॥

विविधविचित्रशक्तिविभवं परमात्मनि ये
श्रुतिशतसूक्तिभिर्विशदयन्ति महागुरवः ।
अहह! तदीयसूक्तिनिकरानवतंसयता-
मपि मुखतः कुचोद्यजननं बहुपुण्यफलम् ॥ १५॥

परब्रह्मणः किं परा शक्तिरस्तीत्यमी मन्वते नेति वेतीह पृच्छाम् ।
इमे पण्डिता नैव वर्षायुतैरप्यवाप्तोत्तरां कर्तुमर्हन्ति साधु ॥ १६॥

वस्तुस्थित्या सुघटमिह यद्यत्तदेवेह कर्तुं
शक्तं ब्रह्मेत्यहह! सहसा व्याहरद्भिर्महद्भिः ।
कोवोत्कर्षो भगवति महाशक्तियुक्तेऽभ्युपेतः
ब्रह्म ब्रह्मेत्यनुपदमियं वाक्तु तेषामनर्था ॥ १७॥

परं ब्रह्म पर्याप्तमेकैकवस्तुन्यपीति स्फुटं रङ्गरामानुजाख्यः ।
यतिः प्राह यत्तत्रचापार्थलेखान् वृथा निर्मिमाणाः परं शोचनीयाः ॥

पर्याप्तिश्च समाप्तिरेव नपुनस्त्वन्येति निर्धार्यतां
निष्कर्षे पुनरीदृशे न हि पुनः क्वापि क्षतिर्ब्रह्मणः ।
एकत्रैव समाप्तरूपमभवद्यत्तत्तदन्यस्थले
व्याप्तिं हन्त कथं करोत्विति कथा हास्यैव वेदान्तिनाम् ॥ १९॥

यद्यप्येकं निरंशं निरवधिविततिं ब्रह्म जागर्त्यथापि
स्वात्याश्चर्योरुशक्त्युत्थितनिजपटुसंकल्पभूम्नैव कामम् ।
एकस्मिन् पूर्णवृत्तिं तदनु तदपरस्मिंश्च योगं विबाधं
प्राप्नोत्येवेति पूर्वैर्गुरुभिरतिदृढं स्थापिते शङ्किता कः ॥ २०॥

पूर्तिर्नाम विभोः पदार्थनिचये कात्स्न्र्येन संबन्धिते-
त्युक्तं यत्त्वनुयुञ्ज्महेऽत्र, तदिदं कात्स्न्र्यं तु कस्येक्षया ।
व्याप्यस्येत्यभिधास्यसे ननु तदा जीवाद्यणुव्यापने
कात्स्न्र्यं हन्त कथं निरूपणसहं नैरंश्यतो बाधनात् ॥ २१॥

व्याप्तुर्दृष्ट्यैव कात्स्न्र्याभ्युपगम इतिचेत् घट्टकुट्यां प्रभातम्
किंरूपं कात्स्न्र्यमेतत् कथयतु सभवान् स्पष्टवाचेति पृष्टे ।
आस्माकीने पथि स्यान्निहितचरणता श्रीमतस्सत्यमेवे-;
त्यस्माकं सेयमुक्तिश्चिरतरजयिनी स्थास्यति प्रेक्ष्यतां भोः ॥ २२॥

अर्च्यस्सन्नयुतायुताधिकमहाबिम्बेषु सान्निध्यभा-
ग्विष्णुः किं प्रतिबिम्बमस्त्यविकलो नो किं? प्रतिब्रूत भोः ।
यद्यस्तीत्यभिधीयते ननु तदा तस्यास्स्थितेः कीदृशी
रीतिस्तामभिधत्त हन्त विविधैर्व्यर्थैरलं वाक्चयैः ॥ २३॥

यदिपुनरसमाप्ता वृत्तिरेकैकबिम्बे
भगवत इति वादस्तर्हि नैकापि मूर्तिः ।
परिधृतपरिपूर्णब्रह्मतत्त्वेति सिद्ध्येत्
विकलभगवदीक्षा कल्पतां कस्य तृप्त्यै? ॥ २४॥

अस्माभिर्नेष्यते किं प्रतिनिलयमपि ब्रह्मणः पूर्णसत्ते-
त्येकोयं शुष्कवादः प्रतिकथकबुधैर्वक्ष्यते तत्तु विघ्नः ।

स्वेषामेतेन लाभः क इति मनसि संचिन्त्यतां दीर्घदृष्ट्या
सिद्धान्तोस्माकमेव प्रभवतु शरणं वादिनामन्यनस्तु ॥ २५॥

समाप्तस्वरूपं बहिर्व्याप्तिशक्तं
कथं वोभवतीति चोद्यं गृणन्तः ।
बुधास्सौभरेस्तुल्यतां वाऽपि विष्णौ
न गृह्णन्ति गृह्णन्ति वा तत्र विघ्नः ॥ २६॥

*अन्तर्गृहे कृष्णमवेक्ष्य चोरं बद्ध्वा कवाटं जननीं गतैका ।
उलूखले तत्र च बद्धमेनं दृष्ट्वा ततस्सा स्तिमिता बभूव ॥*
इत्यादौ कथिता कथा तु वितथेत्येवेति किं वो मतिः?
किं वा सौभरिशक्तिरेव परमे पुंस्यप्यभिप्रेयते? ।
रासोद्धर्षगृहीतगात्रनियुते प्रत्येकशो ब्रह्मणो
रूपं नैव समाप्तिमाप्तवदिति क्षेमंकरो वो ग्रहः ॥ २७॥

ऊर्णनाभ्यभिधजन्तुविशेषे शक्तिरस्ति भुवि यादृशरीतिः ।
नैव तादृगपि पुंसि परस्मिन्नित्युशन्नपि जनस्सुहृदेषाम् ॥ २८॥

विरुद्धधर्मद्वयसङ्गभङ्गं विशेषतो भाष्यकृदाचचक्षे ।
इतीरयन्नत्र बुधस्तु भाष्यविज्ञानवैदेशिक एव सत्यम् ॥ २९॥

नानाक्षोभप्रसङ्गात्समुचितसरणिस्स्वयमेवेति कश्चित्
पन्थानं स्वेच्छयैव प्रकटयति यतिस्सोयमाश्चर्यमेधः ।
सत्यं, ब्रह्मैतदेव त्रिविधमपि भवेत्कारणं विष्टपस्ये-
त्यङ्गीकारोपि दूष्यो भवति न किमहो क्षोभवाचां समत्वात् ॥ ३०॥

सर्वथापि यदसंभवि तत्तु ब्रह्म नैव घटयेत् श्रमतोपि ।
इत्यतीव रुचिरं लिखतां वस्तत्वनिर्णयपटुत्वममेयम् ॥ ३१॥

एतत्संभवि नैतदेवमिति वो निर्धारणं केन वा
मानेनोद्भवतीति पृच्छति जनस्सोयं, प्रतिब्रूत भोः ।
आप्तोक्त्यैव हि बोधनीयविषयस्सोयं, मितज्ञा वयं
हाहा किं कथयेम लौकिकदृशा संभावितत्वं प्रति ॥ ३२॥

यद्यत्कृत्यमभूदिति श्रुतिमुखैर्जानीम आस्तिक्यतः
तत्तत्सर्वमपीह संभवदिति ग्राह्यं हि बोभोति नः ।
नैवंचेदितिहासबोधितकथास्सर्वा असंभाविता
इत्येव प्रणिधेयमापतति नः स्वैरं विमर्शे कृते ॥ ३३॥

शुक्राचार्यसकाशमागतवतो नाम्ना कचस्यासकृत्
जाते मारणजीवने इति कथा (१)या भारते श्रूयते ।
सा किं संभविनी ? महर्षिकथनात्संभावितत्वं मतौ
आवाह्यं भवतीदृशः खलु कथाः पारंपरार्थं श्रुताः ॥ ३४॥

तातोक्त्या नचिकेतसा यमगृहं संजग्मुषा जीवनं
भूयः प्राप्तमभूदिति (२)प्रकटितात्याश्चर्यचर्या भुवि ।
कस्मिन् हन्त कदा नु संभववती ? तत्तादृगाख्यायिका-
स्याप्तोक्तत्वबलाद्धि संभवति नस्संभावितत्वग्रहः ॥ ३५॥

कचस्य नचिकेतसस्तदितरस्य कस्यापि वा
कथा विलिखिता भवेद्यदि जनैरिदानीन्तनैः ।
असंभवविनिश्चयो भवति, सैव पूर्वोदिते-
त्यतो हि सुकृती जनो वदति तां सुसंभाविताम् ॥ ३६॥

---

(१) आदिपर्वणि ७० अध्याये सुविशदं द्रष्टव्या ।

(२) तैत्तिरीय यजुर्ब्राह्मणे काठक द्वितीयप्रपाठके ।

सर्वज्ञस्सर्वशक्तोपि च हरिरिह तद्योजयेद्यन्नुयोगं
कर्मेति प्राह सोयं यतिरिति परितापोयमुक्तेन्न शान्तिम् ।
योगायोगावधानं किमु भवितुमलं क्षुद्रयाऽसद्धियेति
ध्यातुं शक्तिर्न येषामहह कथममी ब्रह्मचिन्तानिषण्णाः ? ॥ ३७॥

आर्यैस्सर्वार्थसिद्धौ न घटयति विभुर्व्याहतं किञ्चनेति
प्रोक्तं यत्तन्न मिथ्या न हि वयमधुना चक्ष्महे तद्विरुद्धम् ।
तस्यार्थस्साधु बोध्यः पटुगुरुचरणाम्भोजसेवैकभाग्यात्
स्वात्मीया भ्रान्तिसंपन्न खलु गुरुवरस्योत्तमाङ्गेऽधिरोप्या ॥ ३८॥

ब्रह्म व्याहतकर्मकर्त्रिति न कोप्याख्याति भक्ताग्रणीः
सर्वं संगतमेव संकलयतीत्यव्याहता पद्धतिः ।
ब्राह्मीं शक्तिमजानतां लघुधियां व्याघातधीर्योदिता
सा लोकार्यपदाब्जभक्तिवरणादन्येन नापैष्यति ॥ ३९॥

शठारातिसूक्तौ (१)*वियप्पायगाथां
मनाक् चिन्तयित्वा मनःकल्मषं स्वम् ।
व्युदस्यन्त्वमी इत्यसावुक्तिरेका
भृशं सारभूतेति सन्तो वदन्ति ॥ ४०॥

स्तम्भादाविरभून्नृसिंहभगवानित्यादिरूपां कथां
यद्दृष्ट्या प्रतियन्ति वैदिकजनास्संभावितां, तद्दृशा ।
नासंभावितमस्ति किञ्चिदपि हि ब्रह्मण्यमेयात्मके
तच्छुष्कोक्तिविलेखनव्यसनिता माभूद्यतीनां मुहुः ॥ ४१॥

(१) திருவாய்மொழியில் (3—1—11) *வியப்பாய வியப்பில்லா மெய்ஞ்ஞானவேதியனை * என்ற பாசுரம். "इतरत्राश्चर्यरूपाणि यद्विषये आश्चर्याणि न भवन्ति, तादृशाम्" इति रङ्गरामानुजमुनीन्द्रटीका ।

व्याघातात्मकहेतुना भगवति क्षेपार्हधर्मो न को-
प्यस्तीति प्रसभं न चक्ष्महे इह श्रोतव्यमेतद्यते ! ।
ये धर्मा उररीकृता भगवति त्वश्रेयसे स्युः परं
तानेव क्षिपति श्रुतिस्मृतिततिर्नो तत्र शक्तेः कथा ॥ ४२॥

श्रीमद्वेदशिरोगुरुर्गुरुवरः श्रीन्यायसिद्धाञ्जने
नैकत्रापि समाप्यवृत्तिमनघां प्रत्याचचक्षे ध्रुवम् ।
मन्त्रार्थाख्यकृतौ तु तां श्लथयतीत्यास्तां, कृतिं तां लिखन्
आचार्योयमुपैद्विलक्षणगुणानित्यप्रधृष्यं वचः ॥ ४३॥

यदि प्रकृतयोर्द्वयोरपि निबन्धयोर्लेखने
गुरोरविषमैव धीर्व्यलसदित्यभिप्रेयते ।
तदाऽञ्जनकृतौ कुतः परिसमाप्यवृत्तिं न तां
निरास्थदिति पृच्छते सदयमुत्तरं दीयताम् ॥ ४४॥

निरास्थदिति नैव कोप्यभिदधात्यनन्धो जनः
न तत्प्रकरणोदयस्समजनीति वा दुर्वचम् ।
यथागममसौ हरिस्सकलवस्तुराशिष्वपि
प्रपूर्ण इति तत्र हि स्फुटमलेखि सिद्धाञ्जने ॥ ४५॥

तच्छारीरक(१)सूत्रमप्युपहरन् श्रीदेशिकस्साञ्जलिः
ब्राह्मं शक्तिविशेषमप्रतिहतं स्वीकृत्य सर्वात्मना ।
संपूर्तिः प्रतिवस्तु तस्य सुवचेत्येव स्वकीयां धियं
निस्सन्देहविपर्ययं विशदयाञ्चक्रे कुतर्कैरलम् ॥ ४६॥

श्रीमद्रहस्यत्रयसारकृत्यां यो ब्रह्मसूत्राणि बहून्युपादात् ।
*श्रुतेस्त्वितीदं स न तत्र दध्यौ तस्मादभूत्तत्र तु तर्कवादः ॥४७॥

(१) श्रुतेस्तु शब्दमूलत्वात् इति ॥

सर्वज्ञस्य गुरूत्तमस्य हृदये सूत्रं तदेतत्तदा
नैवासीदिति कथ्यते मितधिया क्षोदीयसा हा त्वया ।
इत्युद्वेलरुषा विवक्षथ यदि श्रोत्रेपि नन्नाप्र्यते
यत्प्रामाणिकपण्डिता मम गिरं साधीयसीं मन्वते ॥ ४८॥

भाष्ये सूत्रस्य तस्य स्फुटमभिहितमस्तीक्ष्यतां स्फारदृग्भिः
सर्वस्माद्वस्तुवृन्दाद्विसदृशमतुलं ब्रह्म, तस्मिन् विचित्रा ।
शक्तिर्नस्याद्विरुद्धा, तदितरलघुवस्तूपमादृष्ट्यधीनं
यत्किञ्चिचापि चोद्यं न समुचितमिह ब्रह्मणीत्येवमेतत् ॥ ४९॥

अन्यच्चाप्यवधेयमञ्जनकृतिव्याख्यानकर्ता यतिः(१)
मन्त्रार्थोदितखण्डन(२)स्मृतियुतस्तच्छायया पूर्णताम् ।
संशोध्यैव विलेखितुं प्रकरणं लब्ध्वापि कस्मादहो
तूष्णीमेव जगाम, तस्य न मनो ब्रह्मापचारोत्सुकम् ॥ ५०॥

अनाघ्रातदोषे मतेप्यसदीये भवेदेव बाह्यैर्मतैस्तुल्यतेति ।
यदुक्तं तदेतद्यथाजातगोष्ठ्यां सघोषं सकोलाहलं चाभिधेहि ॥ ५१॥

पापीयानिति यस्तु पक्ष उदितः श्रीभाष्यकारोत्तमैः(३)
तत्पक्षस्य तु वैखरी यदिपुनर्विज्ञायते स्वामिभिः ।
तत्साम्यात्मकदूषणार्पणरुचिः स्वप्नेपि वो नोदियात्
ब्रूते भास्करपक्ष एष भगवत्याश्लेषमश्रेयसाम् ॥ ५२॥

ब्रह्मण्यज्ञानवादादपि दुरितमयी ह्युक्तिरेषेति यस्मिन्
ग्रन्थे (३)श्रीभाष्यकारैर्लसति विलिखितं तत्र विष्फार्यतां दृक् ।

---

(१) श्रीरङ्गरामानुजमुनिवर इति यावत् ॥

(२) श्रीमद्रहस्यत्रयसारे मूलमन्त्राधिकारे "வ்யாப்தனுக்கு ப்ரதிவஸ்து பூர்ணத்வமாவது" इत्यादिना कृतं तत्त्वार्थखण्डनम् ॥

(३) वेदार्थसंग्रहे । (आन्ध्रलिपि श्रीकोशे १५३ पुटे द्रष्टव्यम् ।)

पापीयस्त्वस्य तस्य प्रकटनसरणौ यस्समाभाषि दोषः
सोसह्यो भक्तिभाजां, न हि भवति तथात्रेति मन्दोपि विद्यात् ॥५३॥

किंचैतत्सूक्ष्ममीक्ष्यं स खलु न हि जगद् ब्रह्मचेत्यभ्युपैति
द्वन्द्वं, किंत्वेकमेवेत्यभिलपति. ततस्तस्य वादोपहास्यः ।
जातः, तस्यासदुक्तौ कथमिव घटना? नैव तद्वन्मते नः
ब्रह्मण्यश्लीलगन्धोप्युपनमति यते! प्रत्युतोत्कर्षवृद्धिः ॥ ५४॥

स्फुटप्रमाणमन्तरा प्रभोस्समाप्तिसाधनं
न युक्तमित्यलेखि यत् प्रचक्ष्महेऽत्र सूत्तरम् ।
त्रयीशिरोगुरूत्तमो यदाह (१)पूर्ण एवही-
त्यतोधिकं न किञ्चन प्रमाणमत्र लिप्स्यते ॥ ५५॥

अस्माभिस्तस्य भावो विशदमभिहितः पूर्वमेवे'ति वादी
वक्ष्यत्येवात्र बोध्यं - यदुत विलिखितं ताण्डवं व्योम्नि तद्वोः ।
तत्रानेकं विकल्प्याखिलमपि दलितं चक्षुषा देशिकेन
प्रोक्तं - पूर्णत्वमेतत्कथमपि वितथं दूषणं नार्हतीति ॥ ५६॥

ग्रन्थानारूढमंशं विशदमुपदिशन् ग्रन्थवर्त्यर्थतत्त्वं
साटोपं निह्नुतेऽयं यतिरिति सुगमं (२)ह्यञ्जनग्रन्थदृष्ट्या ।
तत्रारम्भे किमाशङ्कितमथ कतमा चोपसंहारवाणी-
त्येतावन्मात्रदृष्ट्याप्यतिसुगमगतिर्देशिकीयाशयोत्र ॥ ५७॥

---

(१) न्यायसिद्धाञ्जने ईश्वरपरिच्छेदे—"एतत्सर्वं * कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा * इति परिचोद्य *श्रुतेस्तु* इत्यादिभिः परिहरन् सूत्रकार एव प्रदर्शितवान् । अतो यथागमं सर्वत्र पूर्ण एव भगवान् ॥" इति सूक्तिरत्रानुसन्धेया ॥

(२) अञ्जनग्रन्थः - न्यायसिद्धाञ्जनम् ॥

अन्ते निष्कर्षघट्टे गुरुवरफणितिः पूर्णएवेतिरूपा
जागर्त्यन्यप्रकारा न विलसति ततः पूर्णतैवात्र साध्या ।
सा चापि ब्रह्मसूत्रोदितगमनिकया धूतदुश्चोद्यगन्धं
स्वीकार्येति प्रतिष्ठापितमभवदतो व्योम्नि नाढ्यं जहीहि ॥ ५८॥

कथञ्चिन्मन्त्रार्थोल्लिखितसरणिं संगमयितुं
प्रयासान् भूयिष्ठाननुभवसि योगीन्द्र विफलान् ।
तदेतद्वुष्णीषानुगुणपरिमाणं निजशिरः
प्रकर्तुं प्रारब्धं यतनमनुरुन्धे त्यज रुषम् ॥ ५९॥

मन्त्रार्थकृत्युत्थितवाक्यखण्डं विस्मृत्य सिद्धाञ्जनसूक्तिरत्नम् ।
संवीक्ष्यतेचेदसमञ्जसार्थप्रतीतिलेशोपि भवेन्न नूनम् ॥ ६०॥

प्रतिवस्तुसमाप्तिरितीदृशवाक् परमात्मनि न ग्रथितेत्यसकृत् ।
विलिखन् यतिरेष निजावसरे किमपूर्णशुभाश्रयमाश्रयते ॥ ६१॥

अघटितघटनायां ब्रह्मणो नास्ति शक्ति-
स्त्वति झटिति लिखन्तो देशिकोक्तिद्रुहस्स्युः ।
द्रमिडनिगमतात्पर्यार्थरत्नावलीकृत्
स खलु गुरुरवोचत्तादृशं(१)शक्तियोगम् ॥ ६२॥

शक्तब्रह्मसहस्रमप्यनिपुणं वाजित्वगोत्वे समं
संदब्धे इह कर्तुमित्यभिलिखन् स्वामी नृसिंहं हरिम् ।
किं श्रोत्रेण च नाशृणोत् किमथ वा तत्रेन्द्रजालत्ववीः
आहोस्विद्विभवावतारघटनं नोद्देश्यमित्याशयः ॥ ६३॥

---

(१) सहस्रगीतौ * கல்குரவும் செல்வும் * इति दशकस्य सारोद्धारश्लोके * अघटितघटनं प्राह कृष्णं शठारिः * इत्यन्वग्राहि ।

आस्माकीनाल्पदृष्ट्या यदिह नसुघटं भाति तत्सर्वमीशः
स्वात्मीयामेयशक्त्या कलयति सुघटं नात्र संदेहलेशः ।
एवं नोचेत्समस्तश्रुतिमकुटपुराणेतिहासप्रकोपो
दुर्वारस्स्यात्तदेतद्विशदमधिगतं देशिकग्रन्थबृन्दात् ॥ ६४॥

अघटितमिति शब्दस्याभिधेयं किमिष्टं
कथय यतिवरेति प्रश्न एकः कृतश्चेत् ।
अथ नियतमसौ स्याद्दिक्षु संभ्रान्तदृष्टिः
किमिति दुरितमीदृकांक्ष्यते भक्तिभाजा ॥ ६५॥

मत्स्यः कूर्मो वराहो नरहरिरथवा वामनो रामभद्रः
कृष्णश्चाविर्भवन्सन् हरिरिह कलयामास यद्यद्धरित्र्याम् ।
तत्सर्वं दुर्घटं वा किमथ सुघटमित्येकमेवानुयोगं
योगीन्द्रोयं सरेच्चेदथ कलुषमयीं स्वां धियं मंक्षु मुञ्चेत् ॥ ६६॥

हूणा अन्ये च नित्यं नवनवधिषणोन्मेषभूम्ना धरण्यां
अत्यन्तं दुर्घटानि क्षणलवकणिकाभ्यन्तरे निर्मिमाणाः ।
दृश्यन्ते यस्य विष्णोरणुतरकृपया, हन्त तस्मिन्नमेये
शक्याशक्यार्थचिन्तामहह ! यतिरसौ धन्यजन्मा करोति ॥ ६७ ॥

द्वीपान्तरोच्चरितवाग्विततीस्स्वगेहे
नक्तंदिवं निशमयन्त्यखिलास्समन्तात् ।
एतादृशानि घटनानि परस्सहस्रा-
ण्याविर्भवन्त्यनुदिनं किमसौ न वेद ॥ ६८॥

यतिरसौ कथयिष्यत ईदृशैर्विलिखितैः प्रकृतार्थनिरूपणे ।
क उपयोग इति, प्रतिवच्मि भोः सुघटदुर्घटवाक्कव नोचिता ॥६९॥

सुविरुद्धसमुच्चयवादिकथानुसृतिः प्रकृते विषये तु कथम् ।
इति किञ्चिदपि ह्यपरामृशतां लपितं प्रति किं कथनीयमिह ॥ ७०॥

तथापि प्रब्रूमो भगवति परब्रह्मणि बुधैः
पदार्थेष्वन्येषु प्रसरमुपयान्त्या लघुदृशा ।
असाङ्कर्त्योद्घोषः कथमपि न कर्तव्य इति हि
प्रसिद्धं (१)सूत्रं तत्प्रथयति, विरोधो न हि ततः ॥ ७१॥

यदुक्तं-सूत्रं तत् सकलविषयेष्वप्यविहत-
प्रचारं सद्भूत्वा भगवति विरुद्धार्थघटनाम् ।
अशेषां सोढव्यां गमयति, नहीदं सुविषहं
यतीन्द्रैः श्रीभाष्ये बहुश इदमुद्दूषितमिति ॥ ७२॥

अत्र ब्रूमोविधेयं पुनरपि विशदं, नैवमापत्तिलेशो-
प्यासाकैर्वैदिकाग्र्यैर्विरचितसुपरिष्कार ईशेऽवकाशम् ।
विन्देताशेषहेयप्रतिभटसुगुणग्रामवेनापनोद्यां
आपत्तिं तात! शश्वत् किमिति कथयसे? शोभनं मौनमेकम् ॥७३॥

अशक्तिं प्रब्रूते भगवति भवान्, भास्करमुखा-
स्त्ववद्यव्यासङ्गप्रसहनकुसृष्टीः प्रसुवते ।
इतीत्थं तत्त्वार्थे विलसति शिलालेखतुलिते
भवन्तो बाह्याश्चेत्युभय इह दायादसुहृदः ॥ ७४॥

"पश्यति परेषु दोषानसतोपि सतोपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन् महिमा मोहाञ्जनस्यैषः ॥"
इति सुभाषितनीव्युदितक्रमो लसति वादिनि चेत् किमु विस्मयः ।
निगममौलिगुरूत्तमवागसौ कथमिहान्यजनेषु फलिष्यति ॥ ७५॥

---

(१) श्रुतेस्तु शब्दमूलत्वादिति ब्रह्मसूत्रम् ॥

जातेर्व्यक्तिषु वर्तनस्य सरणिः कीदृग्घटेतेत्यमूं
चर्चां नैव मनागपि प्रथयितुं हेवाकिनस्स्मो वयम् ।
तत्र श्रैमतनिर्णयस्य गरिमा कामं विजेजीयतां
विष्णौ शक्तिनिकर्षपर्यवसितो वादः परं दुस्सहः ॥ ७६॥

शिवार्कमणिदीपिकागतनिरूपणोक्तीरयं
स्वयं यतिरुदाहरन् विमतवादसौवादवम् ।
न्यरूपयदबाधनं, निजमतानुकूल्येन ताः
ततो घटयितुं मनागपि नशक्तिमांस्ताम्यति ॥ ७७॥

ता अन्यदीयफणितीरुचितार्थशून्या
नैवाद्रियेऽहमिति चेद्यतिनोदितं स्यात् ।
स्यादेव किञ्चिदिव गौरवमस्य वाण्यां
विस्मृत्य तां सरणिमेष मुधाप्रयासी ॥ ७८॥

वेदार्थसंग्रहविवृत्युदिता तु सूक्तिस्संदर्शिताऽभवदहो इह वादिनैव ।
स्वाभीष्टभञ्जनविचक्षणसूक्तिमेतां स्वात्मैव दर्शयति चित्रमिदं पटुत्वम्॥

स्वरूपस्य चैकत्र संपूर्णवृत्त्या न वस्त्वन्तरे तस्य वृत्त्यर्हता स्यात् ।
इतीयं विशङ्का व्युदस्तेति तत्र स्फुटार्था चकास्त्येव भट्टार्यसूक्तिः ॥

विशङ्कात्र कीदृक्? ततस्तद्व्युदासादसिद्ध्यत् फलं कीदृगित्येवमार्यैः।
विमर्शे कृते सिद्ध्यतीशस्वरूपं क्वचित्पूर्णमप्यन्यवृत्तौ च शक्तम् ॥

मूले तत्र तु पूर्वतश्च परतश्चाश्चर्यशक्त्याढ्यता
ब्रह्मण्यच्युत उच्यतेस्म विशदं श्रीभाष्यकारैर्मुहुः ।
तस्मादेव विचित्रशक्तिविभवादेकत्र पूर्णस्य चा-
प्यन्यत्र स्थितिरक्षतेति विशदीकारो बभौ टीकया ॥ ८२॥

शङ्का शङ्कास्पदं चेत्युभयमिह हृदि ध्येयमार्यैः, व्युदासः
शङ्काया उच्यते किं? किमथ तदपरस्येति जाते विमर्शे ।
वैलक्षण्यं प्रमेये नियतमवगतं स्यात्, स्थले प्रस्तुतेऽस्मिन्
शङ्काया एव सुष्ठु व्युदसनमुदितं नापरस्येत्यगूढम् ॥ ८३॥

वैलक्षण्यं यदिदमधुनोदञ्चितं नैतदस-
च्चित्तारूढं भवितुमलमित्येव वादी वदेच्चेत् ।
वैलक्षण्यं तदिदमपयत्संशयं स्पष्टवाचा
व्याख्यास्यामि प्रणिहितमनास्सोत्रधत्तां यतीन्द्रः ॥ ८४॥

ब्रह्मैतन्निर्गुणं वा किमथ गुणयुतं वेति चिन्तास्थले चेत्
साद्गुण्यस्य व्युदासोऽभवदिति लिखितं, तर्हि नैर्गुण्यसिद्धिः ।
साद्गुण्याशङ्कनस्य व्युदसनमितिचेत् निर्गुणत्वं न सिद्ध्येत्
एवंचात्र स्थलेपि व्युदसनफणितिः कस्य जातेत्युदीक्ष्यम् ॥ ८५॥

वृत्त्यर्हत्वव्युदासः कृत इति कथिते ह्येव वादीष्टसिद्धिः
वृत्तेर्दौर्घट्यशङ्काव्युदसनमिति खल्वस्ति सुस्पष्टसूक्तिः ।
किं सिद्धम्? पूर्णता नेत्यभिहितिदलनस्यैव सिद्धेर्ध्रुवत्वात्
पूर्णत्वं निर्विघातं विशयविरहितं चैव निष्पद्यतेत्र ॥ ८६॥

पूर्णत्वं चैतदसन्मतिपरिकलितप्रक्रियाशालि सिद्ध्ये-
दित्येवं नैष वादी कथयितुमधुना शक्तिमासादयेत ।
यच्चोद्यं पूर्णतायामयमभिहितवान् तद्धि शङ्कापदेनो-
पादाय क्षिप्तमासी द्व्युदसनपदतः श्रीयुतैर्भट्टपादैः ॥ ८७॥

पक्षो ब्रह्म समाप्यवृत्तिरिति यत्तत्साध्यं अत्यद्भुता-
मेयामोघमहिष्ठशक्तिविभवो हेतुः, परे वादिनः ।

साध्यं दूषयितुं न पक्षवसतिर्हेतोरिति प्रब्रुव-
न्त्यत्याश्चर्यगरिष्ठशक्तिमहिमा वादिष्वकम्प्यः परम् ॥ ८८॥

वेदान्तद्वयमस्ति वैष्णवधनं, तद्रत्नमञ्जूषिका-
द्वन्द्वोद्घाटनदक्षिणं शृणुत भो स्सत्कुञ्चिकायुग्मकम् ।
विष्णोस्सर्वजगच्छरीरकतया निर्धारणा श्रेयसी
निस्तुल्याभ्यधिकाप्रमेयमहिमोदन्वत्त्वधीश्चेत्यदः ॥ ८९॥

येयेऽर्थाश्शास्त्रदृष्ट्या परमिह महितैस्संप्रतीता लसन्ति
प्रायस्सर्वेपि तेऽस्मन्नयनविषयतां नाप्नुवन्त्यंशतोपि ।
तत्तादृक्षार्थतत्त्वप्रवचनसरणौ ब्रह्मणो वैभवस्य
ह्रासस्स्वल्पोपि माभूदिति गुरुचरणा मेनिरे मान्यमेतत् ॥ ९०॥

किं विस्तृतैर्विलिखितैः प्रतिवस्तु पूर्णं
ब्रह्मेति सर्वगुरुभिस्समकण्ठमेव ।
संशोधिते विमलवर्त्मनि कण्टकौघ
प्रक्षेपणे कृतमतिर्यतिरेष पुण्यः ॥ ९१॥

सोयं श्रीयतिपुङ्गवो निजकृतौ विंशे पुटे स्वाशयं
ब्रूते पश्यत - नैव किञ्चिदपि वा चोद्यावकाशो हरौ ।
नैरङ्श्यस्य बलिष्ठभावविभवादेवेति, नैतन्मुखा-
दायात्यद्भुतशक्तिवैभववचः, द्वेषोऽस्य शक्तौ हरेः ॥ ९२॥

सारं पश्यत, पञ्चविंशतितमे पृष्ठे स्वकृत्यां यतिः
स्वात्मीयस्य मतस्य भञ्जनपटु श्रीभाष्यसूक्त्यादिकम् ।
निस्संकोचमुदाजहार तदनु स्वेष्टानुकूल्येन ताः
निर्वोढुं यतमान एव बहुशोप्यायासशेषः परम् ॥ ९३॥

त्रयोदशपुटे यतिप्रवर एष यत्प्रोक्तवान्
पुनस्तदनुवाचयत्वयमतीव संमर्शनः ।
समाप्तिरिति पूर्तिरित्युभयमप्यभिन्नार्थकं
नचेद्भवति, दुर्हरा नियतमत्र वैयाकुली ॥ ९४॥

पात्रं क्षीरेण पूर्णं त्विति वदति जनः कश्चित्, अन्योभिधत्ते
पात्रे पूर्णं तदासीदिति, ननु वचनव्यक्तियुग्मेऽत्र बोध्यः ।
धीमद्भिर्भावभेदः, प्रथमवचसि तु क्षीरशेषस्य सत्ताऽ-
प्युद्बुध्येतान्यवाक्ये न हि भवितुमलं क्षीरशेषावबोधः ॥ ९५॥

एवं तत्तत्पदार्थः परमपुरुषतः पूर्ण इत्युच्यते चेत्
युष्मद्वादप्रणाली कथमपि सरसा स्यात्तथा नास्ति सूक्तिः ।
एकैकत्रापि पूर्णस्स इति हि निगमान्तार्यवर्यो व्यलेखीत्
सेयं पूर्तिस्समाप्तेः कथमपि न भजेद्भिन्नतामित्यवेहि ॥ ९६॥

मृदुप्रज्ञा यद्यप्यगहनमपीमं सुविषयं
न बोद्धुं शक्तास्स्युः, निपुणमतयस्तु स्फुटतमम् ।
विजानीयुः कामं तदलमधुना प्रेतशिरसि
प्रहारैर्भूयिष्ठैरिति विरमणेच्छा भवति नः ॥ ९७॥

*लङ्कायुद्धहतान् हरीन् द्विजसुतं शम्बूकदोषान्मृतं
सान्दीपिन्यभिजं मृतं द्विजसुतान् बालांश्च वैकुण्ठगान् ।
गर्भं चाऽऽर्जुनिसंभवं व्युदधरत्स्वेनैव रूपेण यः
तस्यैतस्य विचित्रशक्तिविभवं नो सोढुमीष्टे यतिः ॥ ९८॥

काशीस्थो निलयात् किमर्हति निजात् काञ्चीपुरीवासिना
साकं भाषितुमित्यसौ यतिवरः पृष्टो यदि स्यात्पुरा ।

किं ब्रूयात्? न घटेत तत् कथमपीत्येवोक्तवान् स्याद्ध्रुवं
तद्वै संप्रति सर्वजुष्टमभवत्, भूयः किलैतादृशम् ॥ ९९॥

यद्यद्दुर्घटमित्यसौ यतिपतिर्मन्येत तत्सर्वम-
प्यक्ष्णा पश्यति निर्विघातघटनं द्रक्ष्यत्यथो भूरिशः ।
क्षोदीयःक्रिमिनिर्विशेषजनताकृत्येषु सत्स्वीदृशे-
ष्वत्याश्चर्यमहिष्ठशक्तिकपरब्रह्मस्थितिं वेद कः? ॥ १००॥

किं वन्ध्यातनयेन भाषितुमलं विष्णुः? किमाहो भवेत्
व्योमाम्भोरुहसौरभग्रहपटुः? किं वा सशृङ्गं शशम् ।
स्रष्टुं पाटवमाप्नुयादिति मुधाचोद्यानि केषाञ्चन
श्रोत्रेणापि वयं दधीमहि न भोः, व्यासो मुनिः पृच्छयताम् ॥१०१॥

एकोक्तो वाक्यराशिस्त्वभिनवकलितैर्नादयन्त्रैरुपात्तो
यावच्चन्द्रार्कमस्मिन् जगति दिशिदिशि प्रत्यगारं च शश्वत् ।
श्राव्यस्संकल्प्यमानो जयति कथमिदं जाघटीतीति शङ्का
नैवासीदस्य भिक्षोः, भवति तु भगवद्व्यापने सा गरिष्ठा ॥ १०२॥

लोकाचार्यसुसंप्रदायसरणौ येये महार्थास्स्थिताः
प्राधान्येन, यतीन्द्र! ते तु सकलास्सर्वेश्वरोत्कर्षणे ।
विश्रान्ता अतथाविधार्थकणिकाप्यार्यैर्न संभाव्यते
प्रायस्त्वीदृशवैखरीप्रतिभटः पन्था भवत्संश्रितः ॥ १०३॥

वात्सल्यार्थविशोधनं च करुणारूपस्य संशोधनं
भक्तानामपि जातिनाशविषयो न्यासानुपायत्ववाक् ।
अन्येन्येपि च सर्व एव विषया लोकार्यसूक्त्युज्ज्वलाः
निस्तुल्याधिकविष्णुवैभवविशेषोदञ्चनेदम्पराः ॥ १०४॥

आर्याणां हृदये दृढं निविशतामेकोयमर्थो महान्
लोकाचार्यगुरूक्तिसक्तहृदयैर्योयोऽर्थ आम्नायते ।
यायाऽनुष्ठितिरादृताऽस्ति च चिरात्तत्सर्वमप्यञ्जसा
सर्वेशस्य महिष्ठवैभवपरिख्यात्यै परं कल्पते ॥ १०५॥

तत्त्वस्यास्य विशेषतश्च विशदीकारे प्रवृत्ता वयं
प्रत्यंशं च निरूपणं सुनिपुणं ग्रन्थैरनन्तैरिह ।
कुर्वन्तो हि तदातदा सुमनसां मोदाय कल्पामहे
सच्छास्त्रार्थविदूषकेषु मनुजेष्वल्पाऽपि चिन्ता न नः ॥ १०६॥

चिरादेव कक्ष्याद्वयी संप्रवृत्ता हरेस्सर्वलोकैकबन्धोः प्रभावम् ।
अनन्तं च सान्तं च संबोधयन्ती मतद्वन्द्वमप्येतदावश्यकं भोः ॥

भगवत्प्रभावमपकृष्य कश्चिदप्यभिवित्सते न यदि तर्हि भूतले ।
कथमस्तु तस्य विभवं विशेषतो विवरीतुमीदृगवकाशलम्भनम् ॥

भगवान् स्वभूरिमहिमातिशायनं प्रकटीचिकीर्षुरिव मे मुखान्मुहुः ।
विदुषां मुखेन सृजति स्ववैभवहसनैककृत्यनिरताः कृतीरपि ॥१०९॥

भगवानगाय(१)दधिगीतमच्युतः सितकृष्णरूपगतियुग्ममप्यहो ।
प्रलयेप्यनाश्यमिति, तद्गतिद्वयीगमनाधिकारिरचनापि तत्प्रियः ॥

शास्त्रार्थाः क्षुभिता भवन्ति भगवल्लोकार्यसिद्धान्त इ-
त्येवं कैश्चन जल्प्यते ननु तथैवास्तां तदेतद्यते ।

(१) अधिगीतम्—गीतायामिति यावत् । * शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ * इतीयं गीतासूक्तिरत्रानुसन्धेया ।

ब्राह्मं वैभवमप्रमेयममितं सम्यक्प्रतिष्ठापय-
त्यस्मिन्नध्वनि सर्वथापि भगवान् सम्मोदवैवश्यगः ॥ १११॥

शास्त्रार्थान् क्षोभयित्वा भगवति परमं वैभवं ख्याप्यते चेत्
तर्ह्येतन्नैव भूषा भवति भगवतः प्रत्युतावद्यमेव ।
इत्यप्युद्वेलवाचोऽभिदधतु कतिचित् नास्ति कापि क्षतिर्नः
भाष्यादिग्रन्थभोग्या सरणिरनुपमा सेयमेवेति तत्त्वम् ॥ ११२॥

यतीन्द्र! भृशमर्थये प्रणतिशालिना मौलिना
भगो! करिगिरेस्तटे सुचिरवासमासादयन् ।
विवादपदवीं श्रितं विषयवृन्दमेकैकशः
प्रकृत्य, मम वाचिकैस्तदनु शोधनां कारय ॥ ११३॥

एषु स्वामिषु पाण्डिती सुविपुला मेधा महिष्ठेति ये
शंसन्त्यान्तरहर्षतश्चिरममी शंसेयुरेवं यते ।
अप्रामाणिकशुष्कवादविततिप्रख्यापनायासतो
विश्रान्तिर्यदि गृह्यतेऽत्रभवतेत्यव्याजमैत्र्या ब्रुवे ॥ ११४॥

प्रारब्धपण्डितमुखेष्वनिशं स्ववाचां
कोलाहलान् प्रकटयन्नथ तत्तदीयम् ।
श्लाघावचो निशमयन् परितुष्टचित्तो
वर्तस्व मास्म वितथानि वचांसि लेखीः ॥ ११५॥

अथवा जगतामुपकारविधौ भवतां कृतयो गणनां दधते ।
इति दीर्घविमर्शनहृष्टमनाः जगते किमपीह वदाम्युचितम् ॥ ११६॥

श्रीमच्छ्रीकोष्ठियालंयतिवरचरणे निस्तुला भक्तिसंपत्
कार्तज्ञ्यं चाप्रमेयं विलसतु जगतामाशरीरावसानम् ।

यस्मात्सोयं यतीन्द्रो भृशमुपकुरुते तत्त्वयाथात्म्यबोध-
प्रेप्सूनां दासहस्तात्सुविशदविमलग्रन्थवृन्दं सृजन् सन् ॥ ११७॥

*ग्रन्थज्ञैरपहास्यमित्यभिहितं यत्तस्य संस्थापने
नानावर्त्मभिरुद्यतो यतिरयं तत्रैव पद्येऽन्ततः ।
ग्रन्थज्ञैरपहास्यतां न्यगमयत् पश्चात्प्रभोः पूर्णतां
प्रस्तुत्येदृशमामकीनकृतितस्तत्त्वार्थमाचिख्यिपत् ॥ ११८॥

शतश्लोक्यामस्यां प्रतिकथकवादास्तु सकलाः
समूलं निर्धूतास्सकलसुमनोहृद्यसरणौ ।
अथापि प्रत्यर्थी स्वजनसविधे श्रामकवचां-
स्यपाराण्युद्घुष्येत् कथमितरथाऽस्योपशमनम् ॥ ११९॥

द्वारीकृत्य तु दासमेवमुचितं लोकोपकारं बहुं
कुर्वन्नेव यतीश्वरो विजयतां लीलाविभूत्यां चिरम् ।
किञ्च स्वादृतभूमिकोचितवचोवृत्ती परं ख्यापयन्
आयुश्शेषमपोहतात्सकलसत्संभाव्यशान्त्युज्ज्वलः ॥ १२०॥

पुण्यैर्यशो लभ्यत इत्यमुष्याः प्रसिद्धवाचः प्रथमं शरव्यम् ।
सोयं यतिस्तद्धि यशोऽभिरक्षन् जीयाच्चिरं स्वाङ्गुलियोग्यशोकः ॥

अथ सुकुमारमतीनां विशदावगमाय गद्यरूपेण ।
संक्षेपतो लिखामो ब्रह्मव्याप्तौ विवक्षितान् अर्थान् ॥ १२२॥

श्रियःपतिः परमकारुणिकः पुरुषोत्तमः श्रुतीतिहासपुराणदिव्य-सूक्तिप्रभृतिषु भूयोभूयस्समाम्नायते सर्वशक्तिरिति, विचित्रशक्तिरिति, विलक्षणशक्तिरिति, अद्भुतशक्तिरिति, अघटितघटनापटीयानिति च । * पराऽस्य शक्तिर्विविधैव श्रूयते * इत्यादिरौपनिषदी फणितिरिह स्मार्यते ।

अद्भुतशक्तेरस्याः प्रणालीमाचार्यवर्या अभिरामतरमभिदधति। श्रीमतो भगवतो भाष्यकृतो दक्षिणो बाहुरिति प्रथितः श्रीकूरनाथगुरुवरः श्रीमति वैकुण्ठस्तवे—

"किंसाधनः क्व निवसन् किमुपाददानः
कस्मै फलाय सृजतीश इदं समस्तम् ।
इत्याद्यनिष्ठितकुतर्कमतर्कयन्तः
त्वद्वैभवं श्रुतिविदो विदुरप्रतर्क्यम् ॥"

इत्यनुजग्राह । श्लोकरत्नमिदमिह विव्रियते मनाक् । भगवान् सर्वस्रष्टेत्यत्र कुचोद्यान्यवतारयन्ति परे;—सहकारिकारणसनाथानामेव जगति सृष्टिकर्तृत्वसिद्धिरानुभविकी । सर्वस्रष्टुः परमस्य पुंसोपि सहकारिसाधनसनाथता तावदवश्यनिरूपणीया । अन्यथा तु तत्कर्तृका सृष्टिरसंभविनी । यदि कानिचित्सहकारीणि निरूप्यन्ते, अथानुयुज्यते तेषां सृष्टिः केन कृतेति । परमात्मनैवेति वक्ष्यते । तत्सृष्टिकाले कानिपुनस्सहकारीण्यासन्निति पृच्छ्यते । सृष्टित्वावच्छिन्ने सहकारिसमवधानावश्यंभावात् । तत्सहकारितया केषाञ्चिन्निरूपणे कृते पुनस्तेषां सर्गे कानि सहकारीणीति प्रश्नपरम्परा प्रसर्पति । अन्ततः परब्रह्मणा असृष्टानि कानिचिद्वस्तूनि सन्तीत्यभ्युपेयं स्यात् । तथाच भगवतस्सर्वस्रष्टृत्वमपहीयेत ।

एवमन्यदप्यनुयुज्यते. सृजतो भगवतः किंस्विदधिकरणमिति। निराधारस्य स्रष्टृत्वायोगात् । यदि यःकोपि देशोऽधिकरणत्वेन निर्दिश्यते, तर्हि पुनरनुयुज्यते तत्सृष्टिसमये किमधिकरणमासीदिति। पूर्ववदेवात्रापि प्रश्नपरम्परा निरवधिः प्रसर्पेत् । अन्ततो यःकोपि देशो भगवदसृष्टस्सिद्ध्येत् । अत्रापि भगवतस्सर्वस्रष्टृत्ववैकल्यमापतेत् ।

पुनः पृच्छयते ; प्रपञ्चं सृजतः परमात्मनः किमुपादानकारणमिति । अत्रापि सहकारिकारणविषय इव प्रश्नपरम्परा विपत्तिश्च ।

अथ च प्रयोजनविषयेप्येवं प्रश्नः । किं वा फलमभिसन्धाय सृजति भगवानिति । * प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते * इति न्यायादवश्यमभिधेयं सृष्टेः किमपि प्रयोजनम् । तच्च सृष्टेः पूर्वमसिद्धमेव खलु । तथा च तस्य अवाप्तसमस्तकामत्वप्रथाया वैतथ्यं सिद्धम् ।—इतीमानि कुचोद्यानि पूर्वार्धेनानूदितानि ।

अथ तावदुत्तरार्धेन समाहितिः प्रकाश्यते । * त्वद्वैभवं श्रुतिविदो विदुरप्रतर्क्यम् * इति प्रतिपादयन्नसौ श्रीकूरनाथगुरुवरः विचित्रविलक्षणशक्तिशालिनो भगवतः श्रुतिप्रतिपन्नेष्वर्थेषु चोद्यावतारणम् असाम्प्रतमित्युपसंहृतवान् भवति ।

एवमेव निगमान्तमहादेशिकोप्यच्युतशतके (प्राकृतभाषामये)

" पुरिसपहाणसरीरो भुवणाणं होसि अच्चुअ उवाआणम् ।
णिअसंकप्पसणाहो वहसि णिमित्तत्तणंवि अब्भुअसत्ती ॥"

॥ छाया ॥

पुरुषप्रधानशरीरः भुवनानां भवस्यच्युतोपादानम् ।
निजसंकल्पसनाथो वहसि निमित्तत्वमप्यद्भुतशक्तिः ॥

इत्यनुगृह्णन् अन्ततश्च 'अद्भुतशक्ति' रित्युपसंहरन् परकीयकुचोद्यानामिह संभवतां ब्राह्मविचित्रशक्तियोगनिरूपणमात्रनिरसनीयतां प्रदर्शितवान् ।

एवमेवमृचुषामाचार्यपादानां * श्रुतेस्तु शब्दमूलत्वात् * इतीदं ब्रह्मसूत्रमेव प्रधानमवलम्बनमिति प्रतियन्ति परमार्थविदः ।

निर्दिष्टमेतत्सूत्रं * कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा * इति पूर्वपक्षसूत्रोपरि सिद्धान्तसूत्रत्वेन समवतीर्णमिति विदन्ति विपश्चितः। शास्त्रप्रतिपन्नेष्वर्थेषु कुतर्कमूलककुचोद्यप्रपञ्चनप्रयासमहाणतो यथायथं प्रतिपत्तिस्साधीयसीति हि समुपदिशति सूत्रमिदम्।

अथापि भगवतः प्रभावातिशयमसहमानाः परे तदीयव्याप्तिविषये वितण्डाकौशलं विशदीकुर्वन्तीति तन्निषूदनार्थमयमुपक्रमः॥ भगवती श्रुतिराम्नासीत् * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः * इति। अत्रेदं विचारपदम्। अणुभूतेषु वस्तुषु भगवतो व्याप्तिः कीदृशीति। 'नारायणस्सर्वमन्तर्बहिश्च व्याप्य स्थित' इति श्रावयन्ती श्रुतिरियं जीवात्मनो निरवयवत्वेन अन्तर्देशाभावात् स्वघटकतच्छब्दार्थे जीवात्मभेदनिवेशनावश्यम्भावमपेक्षत एवेति परे मन्यन्ते।

तदिदमपरे न सहन्ते। अन्तर्देशस्य सावयवत्वव्याप्यत्वे न तावत्प्रमाणोपलम्भः। निरवयवे प्रधानादौ अन्तर्देशाभ्युपगमेन व्यभिचारश्च। अभ्युपगतश्च प्रधानस्य निरवयवत्वपक्षो वेदान्तदेशिकैस्तत्त्वमुक्ताकलापे * अव्यक्तं त्वन्मतेपि ह्यनवयवम् * इति।

अथ कथयेयुः परे—अणुभिन्नद्रव्यत्वव्याप्यत्वस्यैव अन्तर्देशे स्वीकरणमिष्टं नः; चेतनस्य अणुद्रव्यत्वादन्तर्देशाभावेन उक्तश्रुतिसंकोच आवश्यक एवेति। अत्रैवं समादधते। * य आत्मनि तिष्ठन्नात्मनोन्तरतरः * अणोरणीयान् * इत्यादि श्रुत्या, * कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः * इति गीतावचनेन च चेतनेप्यन्तर्व्याप्तिबोधनादन्तर्देशावश्यकत्वेन श्रुत्यादिविरुद्धस्तादृशनियमो नोपादेय इति।

जिज्ञासाधिकरणश्रुतप्रकाशिकासूक्तिरियमवधेया :— "य आत्मनि तिष्ठन्नित्युक्ते, वेद्यामग्निस्तिष्ठति, तिले तैलं तिष्ठतीतिवत् बहिरबहिस्स्थितिसाधारण्यात् तद्व्युदासार्थमाह * आत्मनोन्तर इति" इति । अन्तरशब्दस्य पट्पार्श्वसंयोगिपरत्वे * आत्मनोन्तरः * इत्येतावतैव बहिस्स्थितेरपि लाभात् * आत्मनि तिष्ठन् * इत्यस्य वैयर्थ्यं दुष्परिहरम् । आत्मनि तिष्ठन्नित्यस्य च वेद्यामग्निस्तिष्ठतीतिवत् बहिस्स्थितिपरत्वम् उदाहृतश्रुतप्रकाशिकयैवावगम्यत इति तस्यान्यथार्थवर्णनमनवकाशपराहतमित्यवधारणीयम् ।

आत्मनि अन्तर्देशाङ्गीकार आवश्यक इति भगवद्भाष्यकारसूक्तिश्च स्फुटमवगमयति । तथाहि—उदाहृतपूर्वगीतावचनघटकस्य * अणोरणीयांसम् * इत्यस्य अर्थं भाषमाणो भाष्यकारः "जीवादपि सूक्ष्मतरम् * इत्यन्वग्रहीत् । आत्मन्यन्तर्देशानङ्गीकारे ईश्वरस्य तदपेक्षया सूक्ष्मतरत्वं न निर्वहेदिति मितमतिरप्यनायासमवगच्छेत् । "जीवादपि सूक्ष्मतरम्" इत्यस्य तदपेक्षया अपकृष्टपरिमाणवन्तमिति नार्थः । तथा सति तु भगवतो विभुत्वप्रतिपादिकाः श्रुतिस्मृतयो व्याकुप्येयुः । नापि तदीयषट्पार्श्वसंयोगित्वं तदर्थः ; तस्य सूक्ष्मतरशब्दार्थत्वाभावात् । किंतु तदल्पदेशसंयोगित्वमेव तदर्थ इति वक्तव्यम् । तथाच आत्मन्यन्तर्देशस्य तदपेक्षयाऽल्पस्यानङ्गीकारे तादृशसूक्ष्मतरत्वानिर्वाहः स्पष्ट एव विदुषाम् ।

* मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव * इत्यनेनापि वचनेन तत्सिद्धिः । सूत्रे मणिगणवत् ब्रह्मणि चेतनाचेतनात्मकप्रपञ्चस्य प्रोतत्वं नाम तत्संयुक्तदेशापेक्षया सर्वदिक्संबन्धित्वमेवेति तादृशप्रोतत्वनिर्वाहाय आत्मन्यन्तर्देशावश्यकत्वमवसेयम् । उदाहृतश्लोके सूत्रस्थानीयत्वं ब्रह्मणः कथितमवहितैरनुसन्धेयम् ।

भगवद्गुणदर्पणेपि भट्टपादैरन्वग्राहि * अणुर्बृहत्कृशस्स्थूलः इत्यत्र अणुपदव्याख्यानावसरे—अतिसूक्ष्मदहराकाशाव्यक्तजीवानुप्रवेशसामर्थ्यात् अणुः" इति । अत्र अव्यक्तादिग्रहणं—यथावा अव्यक्तादावीश्वरस्यान्तर्व्याप्तिस्तथा जीवेपीति दृष्टान्तार्थम् । सा च अघटितघटनाशक्तिनिबन्धनेति ज्ञापयितुं "अनुप्रवेशसामर्थ्यात्" इत्यभाषि ।

श्रीशठकोपमुनीन्द्रदिव्यसूक्तिप्रथमदशकदशमगाथाव्याख्यायां यतिपरिवृढप्रियशिष्यैः श्रीकुरुकेश्वरैरन्वगृह्यत—

"அதிஸூக்ஷ்மமாயிருந்த அசித்வஸ்துக்களிலும் வியாபித்து அவற்றினுள்ளே ப்ரகாசிக்கிற சித்வஸ்துக்களிலும் ஸ்தூலமான அண்டத்தில் வ்யாபித்தாப் போலே அநாயாஸத்தாலே அஸங்குசிதனாய்"

इत्यादि । तत्रैव स्फुटमन्वग्राहि दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजयतिपतिभिरपि—"एकैकस्मिन् जलपरमाणौ अतिविशालब्रह्माण्ड इव व्यक्तिषु जातिवत् पर्याप्तवृत्तिः" इति ।

स्थाने चैतत्; यथा सर्वप्राकृततत्वापेक्षया सूक्ष्मत्वेन प्रमाणप्रतिपन्नस्य जीवस्य स्वापेक्षया स्थूलभूतेष्वव्यक्तादिसर्वतत्त्वेष्वन्तर्व्याप्तिः प्रमाणबलादिष्यते, तथा जीवापेक्षयापि सूक्ष्मतरत्वेन प्रमाण शतप्रतिपन्नस्य सर्वेश्वरस्य स्वापेक्षया स्थूलभूतचेतनादियावद्द्रव्येष्वन्तर्व्याप्तिः प्रमाणबलादेवाभ्युपगम्यत इति नात्र दोषलेशावकाशः । जीवस्य सर्वप्राकृततत्वापेक्षया सूक्ष्मत्वं च *अच्छेद्योयमदाह्योयम्* इत्यत्र गीताभाष्ये व्यक्तम् । तत्रत्या चेयं सूक्तिः—"सर्वगतत्वादात्मनः सर्वतत्वव्यापनस्वभावतया सर्वेभ्यस्तत्त्वेभ्यस्सूक्ष्मत्वात्"

इति । तत्रैव तत्पूर्वतनस्य * अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् *इत्यस्य व्याख्यानावसरे " तदात्मतत्वमविनाशीति विद्धि । येनात्मतत्वेन चेतनेन तद्व्यतिरिक्तमिदमचेतनतत्वं सर्वं ततम्—व्याप्तम् ; व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनः "इति चाभाष्यत ;

केचिदूचुः—* अन्तर्बहिश्चेति श्रुतिसंकोचानावश्यकत्वाय जीवेऽन्तर्देशाङ्गीकारे तत्राप्यन्तर्देशोऽङ्गीकार्य एवं तत्रापीत्यनवस्थापत्तिरिति । अत्रैवं समादधते ; यत्र विशिष्यान्तर्व्याप्तिः श्रुत्या न बोधिता, तत्र (जीवान्तर्देशे) अनवस्थाभिया अन्तर्देशो नाङ्गीक्रियते ; जीवत्वावच्छिन्ने अन्तर्व्याप्तेः श्रुतिबोधितत्वात् * अन्तर्बहिश्चेति श्रुतेरत्राशक्यसंकोचत्वमथवाऽनावश्यकसंकोचत्वं वेदितव्यमिति । वस्तुतो जीवे ब्रह्मस्वरूपातिरिक्तोऽन्तर्देशो नाङ्गीक्रियत इति परमार्थः ॥

॥ इति प्रथमः परिच्छेदः ॥

॥ अथ द्वितीयः परिच्छेदः ॥

॥ विज्ञापनम् ॥

अथ द्वितीयः परिच्छेदोऽस्माभिरतितरां वैपुल्येन विलिखितोऽभूत् । तावतोपि ग्रन्थराशेरिदानीमिह प्रकाशनं नाभिलष्यते । प्रकाशितचरैश्शताधिकैः पद्यैरेव प्रायश्चारितार्थ्यात् संग्रहेण कतिचन वाक्यराशयः केवलमुद्धृत्य प्रकाश्यन्तेऽत्र ।

पूर्वपक्षग्रन्थे षष्ठपृष्ठोपक्रमे—" प्रतिवस्तुपूर्णत्वसर्वव्याप्तत्वयोर्विरोधः शास्त्रबलात्सोढव्य इत्ययमंशः सुस्पष्टं प्रतीयते " इत्यलेखि । एतच्च सिद्धान्त्यभिप्रायानुवादरूपम् । वाक्यानुपूर्वी तु पूर्वपक्षिणां यतीनामेवेति

निश्चयचम् । प्रतिवस्तुपूर्णत्वं सर्वव्याप्तत्वविरुद्धमित्यभिप्रायः पूर्वपक्षिणामनर्गलो जागर्तीति सिद्धम् । तदिदं प्रतिवस्तुपूर्णत्वमेवैतेषां दुर्दूषयिषितमित्यपि सिद्धम् । भगवान् वेदान्तदेशिकस्तु न्यायसिद्धाञ्जने कण्ठरवेण प्रतिपादयति प्रतिवस्तुपूर्णत्वमेव ब्रह्मणः । एवंच पूर्वपक्षिणां प्रत्याख्यानसंभ्रमः श्रीमन्निगमान्तदेशिकादिव्यसूक्तिगोचर एवेति निस्संशयविपर्ययं निपुणैर्निर्धारयितुं प्रभूयते । अन्ततोगत्वा पूर्वपक्षिणामव्यवस्थितचित्तत्वं वा स्वीकार्यं भवेत् । यत इमे लिखन्ति क्वचित् "सर्वव्याप्तत्वविरुद्धं प्रतिवस्तुपूर्णत्वं ब्रह्मणि दुरुपपादम्" इति; अपरत्रच तादृशपूर्णत्वप्रतिपादकदेशिकादिसूक्तीरप्युदाहरन्ति । ग्रन्थलेखनवैखरी सम्यगभ्यसनीयेति प्रतिबोधयामः ।

अथ अष्टमपृष्ठे — "तत्र जातिविषये प्रयुक्तस्य परिसमाप्तिपदस्य स्वरूपसमाप्त्यर्थकत्वेपि न ब्रह्मणि तत्सम्भवः ; तद्विषये तदनुक्तेः" इत्यलेखि । अत्र तद्विषये तदनुक्तेः इत्ययं हेतुरपहास्यः ।

☞ श्रीरङ्गरामानुजमुनीन्द्रसुस्पष्टसूक्त्यनवधान ।

अथ नवमपृष्ठे—"एवं सति शब्दान्तरेण स्वरूपसमाप्तिरेव....ब्रह्मणोङ्गीकृता स्यादिति" इत्युक्तम् । अत्र नचवाच्य मित्येतद्वर्जनीयम् । तच्च अभिनिवेशवशाद्विलिखितमिव यतिवरैः । शब्दान्तरेण स्वरूपसमाप्तिरेव ब्रह्मणोङ्गीकृतेत्यत्र न कापि विप्रतिपत्तिः । यतीनामन्तःकरणं स्वयमेव जानाति तदिदमिति प्रकटमभूत् । तद्वयं प्रहृष्यामश्च ।

यदुक्तम्—"स्वरूपसमाप्तेरत्रैव विद्यमानत्वरूपतया तदभ्युपगमे अन्यत्र विद्यमानत्वं सर्वात्मना न घटते" इति; अत्र किं वक्ष्यामः । अहो! विलक्षणममीषां परब्रह्मशक्तिविशेषविज्ञानवैशारद्यमिति संतोष्टव्यमेव

परम् । परं ब्रह्माप्यसदादिनिर्विशेषमेवेति सुस्पष्टं प्रतिपादयतामेतेषां यतिवराणां पारमैकान्त्यं परमशोभनमिति प्रमोमुद्यामहे ।

अत्रेदमवधेयम् । पूर्वपक्षी तद्वर्ग्याश्च प्रकृतविषये पुनःपुनरेकमेव वादं विवृण्वते—क्वचित्पूर्णत्वे सति अन्यत्र विद्यमानत्वमसंभवीति । न्यायसिद्धाञ्जनरत्नपेटिकायामपि श्रीमत्तिरुप्पुट्कुलिस्वामिपादैर्लिखितमस्ति—"किमिदं प्रत्येकं परिसमाप्यवर्तमानत्वम्? न तावत्तदितरावृत्तित्वे सति तद्वृत्तित्वम्; विभुरूपे ब्रह्मणि तदसंभवात् बहिर्व्याप्तिविरोधाच्च" इति । एतदेव पिष्टपेषणचर्वितचर्वणादिनीत्या यतिभिरप्येतैरसकृद्विलिख्यते । तदिदं श्रीदेशिकदिव्यसूक्तिविमर्शविरहनिबन्धनमेवेति सुष्ठु निरूप्यते । न्यायसिद्धाञ्जने ईश्वरपरिच्छेदे "एवमेव सर्वत्रापि पूर्ण एव" इत्यनुगृह्य सद्य एव "अन्यत्र विद्यमानस्य अन्यत्र पूर्णत्वं न स्यादितिचेत्" इति चोद्यमुत्थापितम् । अस्य चोद्यस्य कथमुत्थितिरिति विमृश्यतां विवेकिभिः । सर्वत्रापि पूर्ण एवेति प्रथमोदिते वाक्ये स्वरूपसमाप्तिरेव अभिसंहितेति स्पष्टमेव खलु भवति । अन्यथा अन्यत्रेत्यादिना चोद्यावतारणस्याप्रसक्तेः । अथ च उत्थापितं तदेतच्चोद्यं कीदृशं पर्यवसानमासादितमिति प्रेक्षणीयम् । "किमिदं पूर्णत्वं निषिद्ध्यते?" इत्युपक्षिप्य तदनु बहुधा व्यकल्प्यत । तत्र प्रथमो विकल्पः "किमत्रैव विद्यमानत्वम्" इति । तत्रोक्तम्—"तस्यास्माभिरनभ्युपगमात्" इति । एकत्रैव विद्यमानत्वं नास्माभिरङ्गीक्रियत इति सत्यमेवैतत् । अन्ततश्च "यथागमं सर्वत्र पूर्ण एव भगवान्" इत्युपसंजह्रे । तत्रैव * श्रुतेस्तु शब्दमूलत्वात् इति ब्रह्मसूत्रावष्टम्भो बलवानभूदाचार्यपादानाम् । श्रीमद्रहस्यत्रयसारमूलमन्त्राधिकारे—

"வ்யாவ்ருத்திக்கு வ்யதிவ்யாப்தி-ஹ்ணா-ஹூமாவது ஓரோரு உவா‌ ய்யுவஹீஙவ்யஷெபமே வவஹைத்தையும் நிர்வஹிக்கவல்ல மக்தி

யுடைத்தாயிருக்கை: அல்லது வஸ்துதோறும் ஸ்வரூபஸமாப்தி யன்று. இது கொள்ளில் வைஷிவ்ஷ்யாவ்ருக்கு விரோதமாம்."

इत्युक्तरीत्या न्यायसिद्धाञ्जने वा प्रामाणिकश्रीमद्रङ्गरामानुजयतीन्द्रकृते तद्व्याख्याने वा नैव लिखितम् ।

तत्रैवेश्वरपरिच्छेदे—ईश्वरो न जगदुपादानम्; जगन्निमित्तत्वात् । यो यन्निमित्तं न स तस्योपादानम्; यथा घटस्यकुलाल इतिचेन्न; धर्मिग्राहकविरोधात्" इत्यनुगृहीता सूक्तिरप्यवधेया । निमित्तकारणस्य सत उपादानकारणत्वमपि न घटत इति चोद्यं धर्मिग्राहकविरोधोक्त्या खल्वपास्तम् । "धर्मिग्राहिकया श्रुत्या उपादानत्वेन प्रतिपन्नत्वेन तद्विरोधादित्यर्थः" इति तत्र रङ्गरामानुजमुनीन्द्रैर्व्याख्यायि । प्रमाणप्रतिपन्नोर्थः कुचोद्यैरविचाल्य इति निष्पन्नम् । तथैवात्राप्यन्तर्यामिब्राह्मणादिप्रतिपन्नं प्रतिवस्तु स्वरूपसमापनं नैवाक्षेप्यमिति निष्पद्यते ।

तत्रैवेश्वरपरिच्छेदे वस्तुपरिच्छेदराहित्यनिरूपणप्रकरणे स्वामिभिरन्वग्राहि—"एतदुक्तं भवति; स्वरूपतो गुणतो विभूतितो वा केनचिदाकारेण कुतश्चिदपकर्षो वस्तुपरिच्छेदः" इति । ब्रह्मतावदेतद्रहितम् । पूर्वपक्षिमतानुसारेण एकत्र समाप्तस्वरूपमन्यत्र व्याप्तुं न प्रभवति ब्रह्मेत्यङ्गीकारे वस्तुपरिच्छेदयुक्तमेव तद्ब्रह्मेत्यकामतोप्यभ्युपगन्तव्यं भवति । एतत्सर्वं हृदि निधायैव श्रीभाष्यकारैरन्वग्राहि—"सकलेतरविसजातीयं श्रुत्यैकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म........परिमितशक्तिकवस्तुचोद्यं न तत्र प्रसज्यते"—"लोकदृष्टविसजातीये परे ब्रह्मणि तत्रतत्रादृष्टास्सहस्रशश्शक्तयस्सन्तीति न किञ्चिदनुपपन्नम्" इत्यादि । *यथागमम् इत्यनुगृह्णन् देशिकमणिरपि पूर्वाचार्यानेव सत्यमनुधावति ।

कृशानर्थानित्याद्यभिहितनयात्तर्कसरणि-
प्रगल्भत्वौत्कट्याद्वयमिह यथाकाममखिलम् ।

विपर्यस्तं कर्तुं ह्यपि सुकुशला इत्यमिदधे
प्रबन्धे यत्रार्यैः, तदुदितवचास्तिष्ठतु तथा ॥

अथ यदुक्तं पूर्वपक्षिभिः—"सर्वव्याप्तत्ववत् स्वरूपसमाप्तत्वस्यापि वाचनिकत्वे हि तदभ्युपगम्य तयोर्विरोधस्य विचित्रशक्तिपरिहार्यत्ववर्णनं शोभेत" इति । अत्रोच्यते । सहस्रगीत्यां "परन्दतण् परवैयुळ्" (பரந்ததண் பரவையுள்) इतीमां गाथां व्याचक्षाणो दशोपनिषद्भाष्यकारो यतिप्रवरः—"एकैकस्मिन् जलपरमाणौ अतिविशालब्रह्माण्ड इव व्यक्तिषु जातिवत् पर्याप्तवृत्तिः" इत्यन्वग्रहीत् । पूर्वपक्षिणां विश्वामित्रसृष्टेरवकाशलेशमप्येषा पङ्क्तिर्न सहत इति किं विशिष्य वक्तव्यम्? अस्या एव गाथाया व्याख्याने (பதினெண்ணாயிரப்படி नाम्नि) प्रकृतपूर्वपक्षियतिसधर्मणा यतिना लिख्यते—"अत्र केचित्, भगवान् अणोरत्यन्ताणुः महतोऽत्यन्तं महानित्याहुः; तदयुक्तम्; अणोरन्तर्देशस्य विभोर्वहिर्देशस्य चाभावेन तदयोगात्." इति । तदिदं प्रदर्शितचरगीताभाष्यादिसूक्तीनामेव प्रत्याख्यानमिति सुगमं विदुषाम् ।

वेदार्थसंग्रहतात्पर्यदीपिकायाम्—"निरंशे प्रतिपदार्थं पूर्णवर्तिन्यपि स्वरूपे अंशशब्दव्यवहारः एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवर्तितया अन्यत्र वृत्त्ययोग्यत्वशङ्काव्युदासार्थः" इत्यनुगृहीतं पूर्वपक्षिभिः पञ्चदशे पृष्ठे प्रदर्शितम् । सैषा सूक्तिरेकैवालं प्रत्यर्थिकुचोद्यकुण्ठने । एकस्मिन् वस्तुनि परिपूर्णवृत्तिकस्य स्वरूपस्य अन्यत्र वृत्तिरयुक्ता स्यादिति शङ्काया व्युदासः फलतीति स्पष्टतरमत्रानुगृहीतम् । या शङ्का पूर्वपक्षिभिः क्रियते तस्या एव हि व्युदास उच्यतेत्र । एकत्र समाप्तस्वरूपस्य अन्यत्र वृत्तियोग्यत्ववादो व्युदस्यत इति नात्र सूक्तिसन्निवेशः । अपितु, अन्यत्र वृत्तियोग्यत्वं कथं स्यादिति शङ्काया एव व्युदासः कण्ठरवेणोक्तः । शङ्कायां व्युदस्तायां एकत्र

समाप्तस्वरूपस्याप्यन्यत्र वृत्तियोग्यत्वमव्याहतमशङ्कनीयं चेति फलतीति तदिदमल्पज्ञोऽप्यनायासेन जानीयात् ।

अस्याऽऽशङ्काया अंशशब्देन व्युदासः कथं फलतीति पृच्छेयुः परे । अवधत्त निरूपयामः । वेदार्थसंग्रहसूक्तिमालिका तत्रैवम्;— "........सर्वशक्तियोगात् स्वैश्वर्यवैचित्र्यमुक्तम् । तदाह * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् * इति. अनन्तविचित्रमहाश्चर्यरूपं जगत् मम अयुतायुतांशेनात्मतया प्रविश्य सर्वं मत्संकल्पेन विष्टभ्य अनेन रूपेण अनन्तमहाविभूतिः अपरिमितोदारगुणसागरः निरतिशयाश्चर्यभूतः स्थितोहमित्यर्थः । तदिदमाह * एकत्वे सति नानात्वं नानात्वे सति चैकता । अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति * इति ।............ ब्रह्मव्यतिरिक्तस्य कस्यचिदपि वस्तुनः एकस्वभावस्य एककार्यशक्तियुक्तस्य एकरूपस्य रूपान्तरयोगः स्वभावान्तरयोगः शक्त्यन्तरयोगश्च न घटते; तस्यैकस्य परस्य ब्रह्मणः सर्ववस्तुविसजातीयतया सर्वस्वभावत्वं सर्वशक्तियोगश्चेति एकस्यैव विचित्रानन्तनानारूपता च........न विरुद्धेति वस्तुमात्रसाम्याद्विरोधचिन्ता न युक्तेत्यर्थ.........अतः विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थः ।" इत्यादिः । एतादृशविचित्रशक्तियोगमेव व्यनक्ति भगवान् * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् * इत्याचक्षाणः । वस्तुतः एकांशेनेति वक्तुं योग्यतायामसत्यामपि तथोक्तिः * अङ्गुल्यग्रेण तान् हन्याम् * इत्यादिवत् प्रभावातिशयप्रख्यापने परं पर्यवस्यति । दुर्वचविचित्रप्रभावातिशयशालिनि मयि माभूवन् कुचोद्यानि—इत्युद्घुष्यतीव भगवान् । इत्यमुमभिप्रायमेव तात्पर्यदीपिकायां भट्टपादाः प्रादर्शयन् । "यस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम्" इति स्तोत्ररत्नसूक्तिव्याख्यातृभिराचार्यपादैरपि संदर्शितमिदमित्यलं विस्तरेण ।

निरतिशयविचित्रं भगवत्स्वरूपयाथात्म्यं यथा ह्यासुरप्रकृतिभिर्नावगम्यते तथा दैवप्रकृतिभिरपि बहुभिर्नावगम्यत एवेति नायमपूर्वो विषयः । "त्वां........नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम्" इत्यनुजग्रहुषामाचार्याणामेव मुखारविन्दात् "मायाबलेन भवतापि निगुह्यमानं पश्यन्ति केचिदनिशं त्वदनन्यभावाः" इत्ययमपि श्लोकः प्रादुरासीदिति प्रसिद्धमेतत् । अत्र च * केचित् * इतीदमवधेयम् ।

आद्यलोकाचार्यगुरुवरश्रीसूक्तिरेषा—"கார்த்தவீர்யார்ஜுநன் என்பானொருவன் தான்ராஜ்யம்பண்ணுகிறகாலத்தில் ஆரேனுமொருவர் பாபசிந்தனைபண்ணினாருண்டாகில் அவர்கள்முன்னே கையும் வில்லுமாய்நின்று அவற்றைத்தவிர்த்துப்போந்தானென்றால் இதுஉபபந்நம்என்றிருப்பார்கள் ; ஒருக்ஷுத்ரமநுஷ்யனுக்கு இதுகூடுமென்றிருக்கிறவர்கள்-ஸர்வசக்தியாய் ஸர்வாந்தர்யாமியாயிருக்கிற ஸர்வேச்வரன் இப்படிவ்யாபித்துநின்று நோக்குமென்றால் இது அநுபபந்நமென்பார்கள். ஜாதி வ்யக்திதோறும் பரிஸமாப்யவர்த்திக்குமென்றால் அசித்பதார்த்தத்துக்கு இதுகூடுமென்றிருப்பார்கள், பரமசேதநனாயிருப்பானொருவன் பரிஸமாப்யவர்த்திக்குமென்றால் இதுகூடாதென்று ஸம்சயியாநிற்பார்கள்." (ஒன்றுந்தேவுஈட்டுப்ரவேஶத்தில்.)

इति । संवत्सरसहस्रात्पूर्वं स्थितवतां भगवत्प्रभावविप्रतिपन्नानां वंशपरम्परा अद्याप्यनुस्यूता प्रसरतीत्यत्र न कोपि विस्मयः ।

ज्ञानभक्तिविरक्तिसम्पत्समृद्धा एते यतिपरिबृढाः (२७ तमे पुटे) महीयसा संरम्भेण विलिखन्ति पश्यत, "नहि गोत्वाश्वत्वे विचित्रशक्तिब्रह्मसहस्रेणाप्येकत्र समावेशयितुं शक्ये भवतः" इति । यतीनां सतां किमित्येतावानाग्रहो भगवति । "ब्रह्मसहस्रेणापि" इति लिखन्त एते परब्रह्मणः परमशक्तौ परमं प्रद्वेषमधिवहन्ति न वेति प्राज्ञास्स्वयं प्रज्ञातुं प्रभवन्ति । परस्य ब्रह्मणः शक्तिर्नास्तीति साधने किमेता-

वता संरम्भेण ज भवितव्यं यतिवराणामिति नासिकाग्रे निदधत्यङ्गुलिमास्तिकमहाभागाः । यदि तत्परंब्रह्म यतिभिरमीभिस्साक्षात्क्रियेत, तर्हि नूनं महांस्तुमुलस्संगरस्संपद्येतैवेत्यपि प्राहुर्बालारण्यस्वामिनः । भगवतः षाड्गुण्ये शक्तिं लक्षयन्तो भट्टपादाः "सा ते शक्तिस्सुकरमितरच्चेति वेलां विलंघ्य । इच्छा यावद्विहरति सदा रङ्गराजानपेक्षा" इत्यन्वगृह्णन् । नरसिंहावतारानुभवप्रकरणे च "विरुद्धे वैयग्रीसुघटितसमानाधिकरणे नृसिंहत्वे बिभ्रत्" इत्यनुजगृहुः । इदमादिपरश्शतसूक्तिविरुद्धतया स्वच्छन्दं लिखतां, तत्रापि भगवत्प्रभावह्रसनैदम्पर्यमाविष्कुर्वतां चामीषां यतिवराणां शुभां मतिमनुगृह्णात्वर्थितार्थपरिदानदीक्षितो भगवानित्याशासते वैदिकवरिष्ठाः । अन्ततश्च श्रीमन्निगमान्तमहादेशिकानां "भक्तस्य दानवशिशोः परिपालनाय भद्रां नृसिंहकुहनामधिजग्मुषस्ते । स्तम्भैकवर्जमधुनापि करीश नूनं त्रैलोक्यमेतदखिलं नरसिंहगर्भम् ॥" इतीदं श्रीसूक्तिरत्नमुपहरामः । इयमेकैव सूक्तिरलं प्रतिपक्षिणां वादविधूननायेति सत्यं निरर्थक एवान्यो ग्रन्थविस्तरः ।

॥ पूर्वपक्षग्रन्थपरिशोधकमहाशय - प्रज्ञावैभव - परीक्षा ॥

अभिनवभट्टबाणविरुदाढ्यमहामतिना
निजगुरुसूक्तिभक्तिविवशेन निजान्निलयात् ।
अवहितवीक्षणेन कृतमुद्रणपुस्तकम-
प्यहह विगर्ह्यदोषकलुषीकृतमस्ति कथम् ॥

इदमवधेयम् । पूर्वपक्षिभिर्यतिवरैः प्रणीतो ग्रन्थः पूर्णत्वविचाराभिधानः कुम्भघोणनगरीय-कोमलाम्बामुद्रायन्त्रालये मुद्रितः । तत्रत्यः श्रीमान् रायम्पेट-कृष्णमाचार्यमहाशय एव प्रकृतग्रन्थमुद्रापक इति

प्रकाशितं प्रेक्ष्यते। सचासौ महान् प्रथयति मुखपत्रे—श्रीकोझियाल-संयमिसार्वभौमचरणकमलसेवासमासादितसकलश्रेयस्कं महामहोपाध्यायं च स्वात्मानम् । एतादृशेन महात्मना स्वाचार्यसूक्तिप्रावण्यगरिम्णा स्वस्थाने सावधानं परिष्कृत्य प्रकटितेऽस्मिन् लघीयसि [कतिपयपत्रमात्रपरिमिते] ग्रन्थे विवेकिगर्हणीया दोषाः किमिति समापतिता इति न जानीमः । "प्रमादादक्षरस्खालित्यसंभवः अवर्जनीय एव; कोत्र विचारः?" इति परे कथयेयुः । अत्र वदामः । (बहून् दोषानुपेक्ष्य द्वित्रान् प्राधान्येन प्रदर्शयामः ।) पूर्वपक्षग्रन्थे द्वितीयपुटे "तस्य निरवयवस्य बहुभवनं च नोपपद्यते" इत्यत्र बहुभवनमितिपदस्थाने बहुवचनमिति निपतितम् । अष्टाविंशे पुटे—"स्वरूपावयवैतदन्यतर" इत्येतत् "स्वरूपावयवैस्तदन्यतर" इत्येवंरूपं निपतितम् । अर्थज्ञानमन्तरैव शोधनकर्म निर्व्यूढमिति निर्धारणमव्याहतं हि भवति । एतादृशानां दोषाणामक्षरसंयोजकस्य अन्यस्य वा शिरसि निपातनं युक्तिसहं वेति विमृशन्तु विचक्षणाः ।

किञ्च, तत्रैव एकादशे पुटे, "यत्तूक्तं श्रुतप्रकाशिकायाम्—'एकस्मिन्.........प्रतीयत इति । तन्न." इत्यवलोक्यते । श्रुतप्रकाशिकायां यदुक्तं तदसंगतमिति महामतिस्स्वाचार्योऽनुगृह्णातीति मन्यमानो महानन्दभरितश्च महामहोपाध्यायस्तादृशप्रतिपत्तिप्रकाशकसंकेतविन्यासानकार्षीत् । श्रुतप्रकाशिकासूक्तिखण्डनाभिनिवेशः प्रतिपक्षिवर्ग्याणामतितरामस्तीति तदातदाऽस्माभिः प्रकाश्यमानं सत्यापितं भवत्यनेन । एतादृशा महानुभावाः श्रीदेशिकसूक्तिसंरक्षणीपरिषदि परिबृढतामनुभवन्तीति युक्तरूपमेवैतत् । स्वविवक्षितार्थान् महामहोपाध्यायानामप्यनावेदयन्ती पूर्वपक्षियतीन्द्राणां कृतिः कस्य वा जनस्योपकाराय कल्पत इति स्वयमेव विवेचयन्तु ते ॥

[illegible]

578934

599036

55902